# Shiv Raksha Stotra Hindi

चरितं देवदेवस्य महादेवस्य पावनम् ।
अपारं परमोदारं चतुर्वर्गस्यसाधनम्
॥१॥

गौरीविनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
शिवं ध्यात्वा दशभुजं शिवरक्षांपठेन्नरः
॥२॥

गंगाधरः शिरः पातु फालमर्धेन्दुशेखरः ।
नयने मदनध्वंसी कर्णौ सर्पविभूषणः
॥३॥

घ्राणं पातु पुरारातिः मुखं पातु जगत्पतिः ।
जिह्वां वागीश्वरः पातु कन्धरं शितिकन्धरः
॥४॥

श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः ।
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक्
॥५॥

हृदयं शंकरः पातु जठरं गिरिजापतिः ।
नाभिं मृत्युंजयः पातु कटिं व्याघ्राजिनाम्बरः
॥६॥

सक्थिनी पातु दीनार्तशरणागतवत्सलः ।
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः
॥७॥

जङ्घे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः ।
चरणौ करुणासिन्धुः सर्वांगानि सदाशिवः
॥८॥

एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् ।
स भुक्त्वा सकलान् कामान् शिवसायूज्यमाप्नुयात्
॥९॥

ग्रहभूतपिशाचाद्याः त्रैलोक्ये विचरन्ति ये ।
दूरादाशु पलायन्ते शिवनामाभिरक्षणात्
॥१०॥

अभयङ्करनामेदं कवचं पार्वतीपतेः ।
भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम्
॥११॥

# Shiv Raksha Stotra english

**Charitam Devadevasy Mahaadevasy Paavanam .**
**Apaaram Paramodaaram Chaturvargasyasaadhanam**
**॥१॥**

**Gowriivinaayakopetam PaÑChavaktram Trinetrakam .**
**Shivam Dhyaatvaa Dashabhujam ShivarakshaanpaṬHennarah**
**॥२॥**

**Gangaadharah Shirah Paatu Phaalamardhendushekharah .**
**Nayane Madanadhvamsii KarṆOw SarpavibhuushaṆAh**
**॥३॥**

**GhraaṆAm Paatu Puraaraatiah Mukham Paatu Jagatpatiah .**
**Jihvaan Vaagiishvarah Paatu Kandharam Shitikandharah**
**॥४॥**

**ShriikaṇṬHah Paatu Me KaṇṬHam Skandhow Vishvadhurandharah .**
**Bhujow Bhuubhaarasamhartaa Karow Paatu PinaakadhṚK**
**॥५॥**

**HṚDayam Shankarah Paatu JaṬHaram Girijaapatiah .**
**Naabhin MṚTyunjayah Paatu KaṬIn Vyaaghraajinaambarah**
**॥६॥**

**Sakthinii Paatu DiinaartasharaṆAagatavatsalah .**
**Uuruu Maheshvarah Paatu Jaanunii Jagadiishvarah**
**॥७॥**

**JaṄGhe Paatu Jagatkartaa Gulphow Paatu GaṆAadhipah .**
**CharaṆOw KaruṆAasindhuah Sarvaangaani Sadaashivah**
**॥८॥**

**Etaan Shivabalopetaan Rakshaan Yah SukṚTii PaṬHet .**
**S Bhuktvaa Sakalaan Kaamaan Shivasaayuujyamaapnuyaat**
**॥९॥**

**Grahabhuutapishaachaadyaaah Trailokye Vicharanti Ye .**
**Duuraadaashu Palaayante ShivanaamaabhirakshaṆAat**
**॥१०॥**

**AbhayaṄKaranaamedam Kavacham Paarvatiipateah .**
**Bhaktyaa Bibharti Yah KaṇṬHe Tasy Vashyam Jagattrayam**
**॥११॥**